संस्कृत

स्तोत्र

क्रं. न. ८

दारिद्र्य दहन स्तोत्र

८९८ | स्तो. ६५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीरामः ॥ विश्वेश्वरायनरकार्णवतारणायकरुणामृतायश
शिभेखरसागराय ॥ कर्पूरकांतिधवलायजटाधरायदारि
द्रदुःखदहनायनमःशिवाय ॥ १ ॥ गौरीप्रियायरजनीश
कलाधरायकालांतकायभुजगाधिपकंकणाय ॥ गंगाधरा
यगजराजविमर्दनायदारिद्रदुःखदहनायनमःशिवाय ॥ २
भक्तिप्रियायभवरोगभयापहायउग्रायदुर्गभगसागरता
रणाय ॥ ज्योतिर्मयायगुणनामसुनृत्यकायदारिद्रदुःखद
हनायनमःशिवाय ॥ ३ ॥ चर्मांबरायशिवभस्मविलेपनायभा
लेक्षणायमणिकुंडलमंडिताय ॥ मंजीरपादयुगुलायजटाध
रायदारिद्रदुःखदहनायनमःशिवाय ॥ ४ ॥ पंचाननायफणि
राजविभूषणायहेमांशुकायभुवनत्रयमंडिताय ॥ आनंदभू

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2)

मिवरदायतमोमयायदारिद्रदुःखदहनायनमःशिवाय॥५
भानुप्रियायभवसागरतारणायकालांतकायकमलापति
पूजिताय॥नेत्रत्रयायशुभलक्षणलक्षितायदारिद्रदुःख
दहनायनमःशिवाय॥६॥रामप्रियायरघुनाथवरप्रदा
यनागप्रियायनरकार्णवतारणाय॥पुण्येषुपुण्यभरितायसु
रार्चितायदारिद्रदुःखदहनायनमःशिवाय॥७॥मुक्तेश्वरा
यफलदायगणेश्वरायगीतप्रियायवृषभेश्वरवाहनाय॥मातं
गचर्मवसनायमहेश्वरायदारिद्रदुःखदहनायनमःशिवाय॥
८॥वसिष्ठेनकृतंस्तोत्रंसर्वरोगनिवारणं॥सर्वसंपत्करंशीघ्रं १
पुत्रपौत्रादिवर्धनं॥त्रिसंध्यंयःपठेन्नित्यंसततंस्वर्गमवाप्नुया
त्॥९॥इतिश्रीवसिष्ठविरचितंदारिद्रदहनस्तोत्रंसंपूर्णं॥ ७॥

(2A)

श्रीराम॥कमललोचनौकांचनांबरौकवचभूषणौकार्मुका
न्वितौ॥कलुषसंहरौकामितप्रदौरहसिनौमितौरामल
क्ष्मणौ॥१॥मकरकुंडलौमौनसेवितौमणिकिरीटिनौमं
जुभाषणौ॥यिनकुलेश्वरौमानुषान्वितौरहसिनौमितौरा
मलक्ष्मणौ॥२॥रणकुतूहलौराक्षसांतकौरतिविहारिणौ
रत्नभूषणौ॥रविकुलोद्भवौराजपुंगवौरहसिनौमितौरा
मलक्ष्मणौ॥३॥वनफलाशनौवल्कलांबरौवनविहारिणौ
वालिमर्द्दिनौ॥वरगुणाकरौसानवस्थितौरहसिनौमितौरा
मलक्ष्मणौ॥४॥पवनजानुगौपादचारिणौपटुशिलीमु
खोपविलांघ्रिपौ॥परमसात्विकौपापनाशिनौरहसिनौमितौ
रामलक्ष्मणौ॥५॥धृतिहिमाचलौदीर्घदर्शिनौधरणिशिखं

(3)

ड्डितौदिव्यविग्रहौ ॥ धृतवस्कपूजितौदीनरक्षितौरहसिनौ
मितौरामलक्ष्मणौ ॥ ६ ॥ धनतरित्रिषौरखड्गधारिणौघन
जटाधरौमंडिताधरौ ॥ हरिहरप्रियौवांछितप्रदौरहसिनौ
मितौरामलक्ष्मणौ ॥ ७ ॥ स्वजनरक्षकौसत्यसंमतौसमरि
भीकरौसीतयान्वितौ ॥ सहृयमानसौसर्ववंदितौरहसिनौ
मितौरामलक्ष्मणौ ॥ ८ ॥ रसरुणास्यहंराघवाष्टकंरह
सियः पठेद्रामभक्तिदं ॥ रहितकल्मषौरामसंनिधौरवि
शशिप्रभौराजतेसदा ॥ ९ ॥ ॥ इतिश्रीमत्परमहंसपरि
व्राजकाचार्यश्रीमच्छंकराचार्यविरचितंराघवाष्टकस्तोत्रं ९
संपूर्णम् ॥ ॥ श्रीमत्सीतारामचंद्रार्पणमस्तु ॥ ॥ छ ॥
श्रीरामः प्रीयतांनममम ॥ ॥ श्रीराम समर्थ ॥ छ ॥

Joint project of Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com